श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ एकोनषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनषष्टितमः सर्गः ॥

## विश्वामित्रेण त्रिशङ्कुमाश्वास्य तदीयं यज्ञं कारयितुमृषीणामामन्त्रणं स्ववाक्यमनङ्गीकृतवतां समहोदयानां मुनिपुत्राणां शापद्वारा विनाशनं च

उक्तवाक्यं तु राजानं कृपया कुशिकात्मजः।
अब्रवीन्मधुरं वाक्यं साक्षाच्चण्डालतां गतम्॥ **1.59.1** ॥

इक्ष्वाको स्वागतं वत्स जानामि त्वां सुधार्मिकम्।
शरणं ते प्रदास्यामि मा भैषीर्नृपपुङ्गव॥ **1.59.2** ॥

अहमामन्त्रये सर्वान् महर्षीन् पुण्यकर्मणः।
यज्ञसाह्यकरान् राजंस्ततो यक्ष्यसि निर्वृतः॥ **1.59.3** ॥

गुरुशापकृतं रूपं यदिदं त्वयि वर्तते।
अनेन सह रूपेण सशरीरो गमिष्यसि॥ **1.59.4** ॥

हस्तप्राप्तमहं मन्ये स्वर्गं तव नराधिप।
यस्त्वं कौशिकमागम्य शरण्यं शरणागतः॥ **1.59.5** ॥

एवमुक्त्वा महातेजाः पुत्रान् परमधार्मिकान्।
व्यादिदेश महाप्राज्ञान् यज्ञसम्भारकारणात्॥ **1.59.6** ॥

सर्वाञ्शिष्यान् समाहूय वाक्यमेतदुवाच ह।
सर्वानृषीन् सवासिष्ठानानयध्वं ममाज्ञया॥ **1.59.7** ॥

सशिष्यान् सुहृदश्चैव सर्त्विजः सुबहुश्रुतान्।
यदन्यो वचनं ब्रूयान्मद्वाक्यबलचोदितः॥ **1.59.8** ॥

तत् सर्वमखिलेनोक्तं ममाख्येयमनादृतम्।
तस्य तद् वचनं श्रुत्वा दिशो जग्मुस्तदाज्ञया॥ **1.59.9** ॥

आजग्मुरथ देशेभ्यः सर्वेभ्यो ब्रह्मवादिनः।
ते च शिष्याः समागम्य मुनि ज्वलिततेजसम्॥ **1.59.10** ॥

ऊचुश्च वचनं सर्वं सर्वेषां ब्रह्मवादिनाम्।
श्रुत्वा ते वचनं सर्वे समायान्ति द्विजातयः॥ **1.59.11** ॥

सर्वदेशेषु चागच्छन् वर्जयित्वा महोदयम्।
वासिष्ठं यच्छतं सर्वं क्रोधपर्याकुलाक्षरम्॥ **1.59.12** ॥

यथाह वचनं सर्वं शृणु त्वं मुनिपुङ्गव।
क्षत्रियो याजको यस्य चण्डालस्य विशेषतः॥ **1.59.13** ॥

कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः।
ब्राह्मणा वा महात्मानो भुक्त्वा चाण्डालभोजनम्॥ **1.59.14** ॥

कथं स्वर्गं गमिष्यन्ति विश्वामित्रेण पालिताः।
एतद् वचननैष्ठुर्यमूचुः संरक्तलोचनाः॥ **1.59.15** ॥

वासिष्ठा मुनिशार्दूल सर्वे सहमहोदयाः।
तेषां तद् वचनं श्रुत्वा सर्वेषां मुनिपुङ्गवः॥ **1.59.16** ॥

क्रोधसंरक्तनयनः सरोषमिदमब्रवीत्।
यद् दूषयन्त्यदुष्टं मां तप उग्रं समास्थितम्॥ **1.59.17** ॥

भस्मीभूता दुरात्मानो भविष्यन्ति न संशयः।
अद्य ते कालपाशेन नीता वैवस्वतक्षयम्॥ **1.59.18** ॥

सप्तजातिशतान्येव मृतपाः सम्भवन्तु ते।
श्वमांसनियताहारा मुष्टिका नाम निर्घृणाः॥ **1.59.19** ॥

विकृताश्च विरूपाश्च लोकाननुचरन्त्विमान्।
महोदयश्च दुर्बुद्धिर्मामदूष्यं ह्यदूषयत्॥ **1.59.20** ॥

दूषितः सर्वलोकेषु निषादत्वं गमिष्यति।
प्राणातिपातनिरतो निरनुक्रोशतां गतः॥ **1.59.21** ॥

दीर्घकालं मम क्रोधाद् दुर्गतिं वर्तयिष्यति।
एतावदुक्त्वा वचनं विश्वामित्रो महातपाः।
विरराम महातेजा ऋषिमध्ये महामुनिः॥ **1.59.22** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनषष्टितमः सर्गः॥